# भाषाप्रयोगशाला





# भाषाप्रयोगशालायाः अर्थः




भाषाप्रयोगशाला विशेषविधिना यन्त्रैः वा सज्जितः कश्चन शिक्षणप्रकोष्ठः, यत्र भाषायाः शिक्षा प्रदीयते।

# भाषाप्रयोगशालायाः सम्प्रत्ययः

- विकशितप्रयोगशालासु मुद्रितभाषणेन व्याख्यानेन वा छात्रेभ्यः अनुदेशनम् आदौ प्रदीयते ।
- अत्र छात्राः ध्वनिग्रहणयन्त्रमाध्यमेन पठितभाषासु उक्तानि पदानि वाक्यानि च शृण्वन्ति ।
- अत्र कथयितुः शब्दान् वाक्यानि च द्विवारं श्रोतुं ध्वनिमुद्रणयन्त्रस्य स्थगनं मध्ये मध्ये क्रियते ।

# लक्षणम्

शिरस्पट्टिकाः ध्वनिवर्धकानि च आयोजितानि भवन्ति। भाषाप्रयोगशालायां समायोजितानि यन्त्रोपकरणानि नूतनभाषायाः वर्णानां,पदानां,वाक्यानाञ्च उच्चारणस्य सम्यक् श्रवणाय उपकुर्वन्ति। अक्षराणाम् उच्चारणे स्वरस्तरः,वेगः,स्पष्टता,बलं,समता इत्यादीन् अवगन्तुं ध्वनिमुद्रिकाः, ध्वनिमुद्रणयन्त्राणि

# भाषाप्रयोगशालायाः उपयोगिताः

1. एषा वैयक्तिकभिन्नतानुगुणं भाषाभ्यासार्थं छात्रान् सहकरोति ।
2. अध्यापकस्य अभावे अपि छात्राः स्वयं भाषाभ्यासं कर्तुं शक्नुवन्ति
3. प्रयोगशालायामेव भाषाभ्यासार्थम् अधिकतया पुनरावृत्तिः भवितुमर्हति ।
4. प्रयोगशालायां भाषाभ्यासार्थम् अधिकसमयः लभ्यते ।
5. छात्रः स्वीयदोषान् स्वयमवगन्तुं शक्नोति ।
6. श्रुत्वा उच्चारयितुम् अत्र समुचितः अवकाशः विद्यते ।

# भाषाप्रयोगशालायाः आवश्यकताः

1. छात्राणां वैयक्तिकभेदेन तेषाम् अधिगमयोग्यता अपि भिन्ना भवति। अतः भाषाधिगमे अपि वैयक्तिकयोग्यतानुगुणं शिक्षणदानार्थं भाषाप्रयोगशालायाः आवश्यकता विद्यते ।

2. सफलसम्प्रेषणे भाषायाः भाषणकौशलस्य च अधिकं महत्त्व वर्तते। अतः भाषणकौशलसवर्धनाय तत्तद्भाषाभाषिणां सम्भाषणं मुद्रयित्वा छात्रेभ्यः श्राव्यते। एतेनैव ते अभ्यसन्ति।

3. भाषाध्ययने वारम्वारम् अभ्यासस्य आवश्यकता अस्ति । असकृत श्रोतव्यम उच्चारणीयं च भवति। एतदर्थं

# भाषाप्रयोगशालायाः निर्माणम्

भाषाप्रयोगशालायां त्रयः विभागाः वर्तन्ते-

1. श्रवणविभागः
2. सहायकविभागः
3. नियन्त्रनविभागः

# भाषाप्रयोगशालायाः सीमा

1. श्रवणभाषणकौशलयोः कृते उपयोगः न तु पठनलेखनकौशलयोः।
2. अस्याः उपयोगः एकवारं 10-20 छात्राणां कृते एव भवति।
3. धनव्यायः भवति।
4. अन्यविषयाणां बोधने इयं नोपकरोति।
5. अस्मिन् क्षेत्रे प्रशिक्षिताध्यापकाः विरलाः भवन्ति।


धन्यवाद